# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्
## सत्रान्तपरीक्षा-नवम्बर/दिसम्बर-२०१६

| | | |
|---|---|---|
| **कक्षा - शास्त्री-२, सेमेस्टर-३** | **प्रश्नपत्रम् - ५** | **गुणाः - ७०** |
| **विषयः - पुराणेतिहासः** | **कोड - CC-2.3.5** | **समयः - ०३-०६** |
| **दिनाङ्कः - २९.११.२०१६** | **ग्रन्थः - श्रीमद्भागवतमहापुराणे चतुर्थस्कन्धः** | |

---

### प्रथमान्वितिः ( युनिट - १ )

**प्रश्नः १ कयोरपि द्वयोः श्लोकयोः ससन्दर्भप्रसङ्गपूर्वकं संस्कृते व्यख्या कार्या । ०८**

(१) *सत्त्वं विशुद्धं वसुदेवशब्दितं यदीयते तत्र पुमानपावृतः ।*
*सत्त्वं च तस्मिन् भगवान् वासुदेवो ह्यधोक्षजो मे नमसा विधीयते ।*

(२) *यद् द्वयक्षरं नाम गिरेरितं नृणां सकृत्प्रसङ्गादघमाशु हन्ति तत् ।*
*पवित्रकीर्तिं तमलङ्घ्यशासनं भवानहो द्वेष्टि शिवं शिवेतरः ॥*

(३) *गुणाधिकान्मुदं लिप्सेदनुक्रोशं गुणाधमात् ।*
*मैत्रीं समानादन्विच्छेन्नतापैरभिभूयते ॥*

**प्रश्नः २ सविस्तरमुत्तरं लिखत ।( एकस्य ) ०८**

(१) *स्वायम्भुवमनोः पुत्रीवंशवर्णनं विधीयताम् ।*

(२) *दक्षयज्ञविधायीप्रसङ्गं ग्रन्थोक्तदिशा विवर्ण्यताम् ॥*

**प्रश्नः ३ द्वयोः टिप्पणीं लिखत । ०४**

*(१) सतेः अग्निप्रवेशः । (२) ध्रुवस्य वनगमनम् ।*
*(३) वीरभद्रोत्पत्तिः । (४) ध्रुवस्तुतिः ।*

**प्रश्नः ४ पञ्चानाम् लघूत्तरं लिखत । ०५**

(१) *चतुर्थस्कन्धे कति अध्यायाः सन्ति ?*
(२) *भागवते कति अध्यायास्सन्ति ?*
(३) *ध्रुवस्य मातुः नाम किम् ?*
(४) *सतेः पितुः नाम किम् ?*
(५) *वीरभद्रः शिवस्य कस्मात् अङ्गात् प्रादुर्भूतः ?*
(६) *ध्रुवस्तुतौ कति श्लोकाः कश्च ध्रुवस्य गुरुः ?*
(७) *मनोः द्वौ पुत्रौ कौ ?*

### द्वितीयान्वितिः ( युनिट - २ )

**प्रश्नः ५ कयोरपि द्वयोः श्लोकयोः ससन्दर्भेप्रसङ्गं संस्कृते व्याख्या कार्या । ०८**

(१) *शान्ताः समदृशः शुद्धाः सर्वभूतानुरञ्जनाः ।*
*यान्त्यञ्जसोऽच्युतपदमच्युतप्रियबान्धवाः ॥*

(२) *य उद्धरेत्करं राजा प्रजा धर्मेष्वशिक्षयन् ।*
*प्रजानां शमलं भुङ्क्ते भगं च स्व जहाति सः ॥*

(३) *ब्रह्मण्यदेवः पुरुषः पुरातनो नित्यं हरिर्यच्चरणाभिवन्दनात् ।*
*अवाप लक्ष्मीमनपायिनीं यशो जगत्पवित्रं च महत्तमाग्रणीः ॥*

**प्रश्नः ६ एकस्य सविस्तरमुत्तरं लिखत ।** **०८**

(१) *पृथुचरितं सविस्तरं ग्रन्थोक्तदिशा लिखत ।*
(२) *पृथवे प्रदत्तः सनकादीनामुपदेशः ।*

**प्रश्नः ७ एकां टिप्पणीं लेखत ।** **०२**

*(१) पृथ्व्याः दोहनम् ।* *(२) पृथोः स्वप्रजाभ्य उपदेशः ।*

**प्रश्नः ८** *द्वयोः लघूत्तरं लिखत ।* *०२*

*(१) पृथोः पत्न्याः नाम किम् ?*
*(२) पृथोः पितुः नाम किम् ?*
*(३) पृथुना कति अश्वमेघयज्ञाः कृताः ।*

## तृतीयान्वितिः ( युनिट - ३ )

**प्रश्नः ९ द्वयोः ससन्दर्भप्रसङ्गं संस्कृते व्याख्या कार्या ।** **०८**

(१) *अनुदितमिदमादरेण शृण्वन् पृथुचरितं प्रथयन् विमुक्तसङ्गः ।*
*भगवति भव-सिन्धुपोतपा स च निपुणां लभते रतिं मनुष्यः ॥*

(२) *नमो नमोऽनिरुद्धाय हृषीकेशेन्द्रियात्मने ।*
*नमः परमहंसाय पूर्णाय निभृतात्मने ॥*

(३) *दयया सर्वभूतेषु सन्तुष्ट्या येन केन वा ।*
*सर्वेन्द्रियोपशान्त्या च तुष्यत्याशु जनार्दनः ॥*

**प्रश्नः १० एकस्य सविस्तरमुत्तरं लिखत ।** **०८**

(१) *पुरञ्जनोपाख्यानं सविस्तरं विवर्ण्यताम् ।*
(२) *अविज्ञातस्योपदेशेन पुरञ्जनस्य मुक्तिं वर्णयत ।*

**प्रश्नः ११ टिप्पणीद्वयं लिखत ।** **०४**

*(१) नारदस्य प्रचतसोभ्य उपदेशः ।*
*(२) भगवतः रुद्रस्योपदेशः ।*
*(३) कालकन्याचरितम् ।*
*(४) चतुर्थस्कन्धस्य सारः ।*

**प्रश्नः १२ पञ्चानां लघूत्तरं लिखत ।** **०५**

*(१) चतुर्थस्कन्धस्य नाम किम् ?*
*(२) व्यासस्य मातुः नाम किम् ?*
*(३) मैत्रेयेण कस्मै कथा कथिता ?*
*(४) भागवते कति श्लोकाः ?*
*(५) अविज्ञातः अर्थात् कः ?*
*(६) पुरञ्जनी नाम का ?*
*(७) भागवते कति स्कन्धास्सन्ति ?*

=०=